श्रीः भैरव्युवाच ॥ कालीपूजा श्रुता नाथ भावाश्च विविधाः प्रभो
॥ इदानीं श्रोतुमिच्छामि कवचं पूर्वसूचितं ॥ त्वमेव शर
णं नाथ त्राहि मां दुःखसागरात् ॥ भैरव उवाच ॥ रहस्यं
शृणु वक्ष्यामि भैरवी प्राणवल्लभे ॥ २ ॥ श्रीजगन्मंगलं
ना. कवचं मंत्रविग्रहं ॥ पठित्वा पाठयित्वा च त्रैलोक्यं
मोहयेत् क्षणात् ॥ ३ ॥ नारायणोपि यद्धृत्वा नारी भू
त्वा महेश्वरं ॥ गौरीसंक्षोभमनयत् यद्धृत्वापि रघूद्व
हः ॥ ४ ॥ वरदृप्तान् जिघांसुः रावणादिनिशाचरा
न् ॥ यस्य प्रसादादीशोपि त्रैलोक्यविजयी प्रभुः ॥ ५ ॥
धनाधिपः कुबेरोपि सुरेशोभूच्छचीपतिः ॥ एवं हि स

कृत्वा देवाः सर्वसिद्धीश्वराः प्रिये॥६॥ श्रीजगन्मंगलस्या
३ स्य कवचस्य ऋषिः शिवः॥ छंदोनुष्टुप् देवता च कालि
का दक्षिणेरिति॥७॥ जगतां मोहने दुष्टविजये भुक्ति
मुक्तिषु॥ योषिताकर्षणे चैव विनियोगः प्रकीर्तितः
॥८॥ शिरो मे कालिका पातु क्रींकारैकाक्षरीश्वरी॥
॥ क्रीं क्रीं क्रीं मे ललाटं च कालिका खड्गधारिणी॥
९॥ हूं हूं पातु नेत्रयुग्मं ह्रीं ह्रीं पातु श्रुती मम॥ दक्षि
णे कालिका पातु घ्राणयुग्मं महेश्वरी॥१०॥ क्रीं ३
क्रीं क्रीं रसनां पातु हूं हूं पातु कपोलकं॥ वदनं सकं



लं पातु ह्रीं ह्रीं स्वाहा स्वरूपिणी॥११॥ द्वाविंशत्य
क्षरी स्कंधौ महाविद्याखिलप्रदा॥ खड्गमुंडधरा
काली वरदाभयधारिणी॥१२॥ विद्याभिः सकला
भिः सा सर्वांगमभितोवतु॥ क्रीं हूं ह्रीं त्र्यक्षरी पातु
चामुंडा हृदयं मम॥१३॥ ऐं हूं ओं ऐं स्तनद्वंद्वं ह्रीं फ
ट् स्वाहा ककुत्स्थलं॥ अष्टाक्षरी महाविद्या भुजौ
पातु सकर्तृका॥१४॥ क्रीं क्रीं हूं हूं ह्रीं ह्रीं करौ का
ली पातु षडक्षरी॥ क्रीं नाभिं मध्यदेशं च दक्षिणे का
लिकेवतु॥१५॥ ह्रीं स्वाहा पातु पृष्ठं च कालिका सा

दशाक्षरी॥हूंह्रींदक्षिणेकालिकेहूंह्रींपातुकटिद्वयं
२ ॥१६॥कालिकादशाक्षरीविद्यास्वाहाचैवोरुयुग्म
कं॥ओंह्रींक्रींमेस्वाहापातुजानुनीकालिकासदा॥
॥१७॥कालीश्रुतासुविद्येयंचतुर्वर्गफलप्रदा॥क्रीं
हूंह्रींपातुसागुल्फंदक्षिणेकालिकेऽवतु॥१८॥क्रीं
हूंह्रींस्वाहापादंपातुचतुर्दशाक्षरीमम॥खड्गमुंड
धराकालीवरदाभयधारिणी॥१९॥विद्याभिः
सकलाभिःसासर्वांगमभितोऽवतु॥कालीकपा २
लिनीकुल्लाकुरुकुल्लाविरोधिनी॥२०॥विप्रचित्ता



तथैवोग्राप्रभादीप्ताघनत्विषा॥नीलाघनाबलाका
चमात्रामुद्रामिताचमा॥२१॥एताःसर्वाखड्गकरामु
डमालाविभूषणाः॥तर्जनींवामहस्तेनधारयंत्यःशु
दिग्वि चिस्मिताः॥२२॥रक्षंतुमांदिक्षुब्राह्मीनारायणीत
था॥माहेश्वरीचचामुंडाकौमारीचापराजिता॥२३॥वा
राहीनारसिंहीचसर्वाश्चामितभूषणाः॥रक्षंतुस्वा
युधैर्दिक्षुमांविदिक्षुयथातथा॥२४॥इतितेकथितं
दिव्यंकवचंपरमाद्भुतं॥श्रीजगन्मंगलंनाममहावि
द्यौघविग्रहं॥२५॥त्रैलोक्याकर्षणंब्रह्मन्कवचंम

का॰क मुखोदितं॥ गुरुपूजांविधायाथविधिवत्प्रपठेन्नरः
॥२६॥ कवचंत्रिःसकृद्वापियावज्ज्ञानंचवापुनः
३ ॥ एतच्छतार्धमावर्त्यत्रैलोक्यविजयीभवेत्॥२७॥
त्रैलोक्यंक्षोभयेदेवकवचस्यप्रसादतः॥ महाक
विर्भवेन्मासात्सर्वसिद्धीश्वरोभवेत्॥२८॥ पु
ष्पांजलिंकालिकायैमूलेनैवपठेत्सकृत्॥ श
तवर्षसहस्राणिपूजायाःफलमाप्नुयात्॥२९॥
भूर्जेविलिखितंचैतत्स्वर्णस्थंधारयेद्यदि॥ ३
शिखायांदक्षिणेबाहौकंठेवाधारयेद्बुधः॥

३०॥ त्रैलोक्यंमोहयेत्क्रोधात्त्रैलोक्यंचूर्णयेत्क्षणा
त्॥ पुत्रवान्धनवान्श्रीमान्नानाविद्यानिधिर्भ
वेत्॥३१॥ ब्रह्मास्त्रादीनिशस्त्राणितद्गात्रस्पर्शना
त्ततः॥ नाशमायांतिवानारीवंध्यावामृतपुत्रिका॥
३२॥ कंठेवावामबाहौवाकवचस्यास्यधारणात्॥
बहुपत्याजीववत्साभवत्येवनसंशयः॥३३॥ नदे
यंपरशिष्येभ्योह्यभक्तेभ्योविशेषतः॥ शिष्येभ्योभ
क्तियुक्तेभ्योह्यन्यथामृत्युमाप्नुयात्॥३४॥ स्पर्धा
मुद्धूयकमलावाग्देवीमंदिरेमुखे॥ पौत्रांतंस्थैर्यमा

का.क. स्थायानिवसत्येवनिश्चितं।।३४।।इदंकवचमज्ञात्वायोभ
जेत्कालिदक्षिणां।।शतलक्षंप्रजप्त्वापितस्यविद्या
४ नसिध्यति।।३५।।सशस्त्रघातमाप्नोतिसोचिरान्मृ
त्युमाप्नुयात्।।इतिश्रीभैरवीतंत्रेकालिकस्यैजग
न्मंगलंनामकवचंसमाप्तं।।

४